# Urdhvamnaya Guru Stotram




शिरःस्थसितपङ्कजे तरुणकोटिचन्द्रप्रभं
वराभयकराम्बुजं सकलदेवतारूपिणम् ।

भजामि वरदं गुरुं किरणचारुशोभाकुलं
प्रकाशितपदद्वयाम्बुजमलक्तकोटिप्रभम् ॥ १ ॥

जगद्भयनिवारणं भुवनभोगमोक्षप्रदं
गुरोः पदयुगाम्बुजं भजति यत्र योगे जयम् ।
भजामि परमं गुरुं नयनपद्ममध्यस्थितं
भवाब्धिभयनाशनं शमनरोगकालक्षयम् ॥ २ ॥

प्रकाशित सुपङ्कजे सुदलषोडशाख्ये प्रभुं
परापरगुरुं भजे सकलराज्यभोगप्रदम् ।
विशालनयनद्वयाम्बुजतडित्प्रभामण्डलं
कडारमणिपाटलद्युतिमदिन्दुबिन्द्विन्दुकम् ॥ ३ ॥

महौजसमुमापतेर्विगतदक्षभागे हृदि
प्रभाकरशतोज्ज्वलं सुविमलेन्दुकोट्याननम् ।
भजामि परमेष्ठिनं गुरुमतीवशोभोज्ज्वलं
चलाचलकलेवरं प्रचपले दले द्वादशे ॥ ४ ॥

गुर्वङ्घ्र्यब्जं शुभं मदननिदहनं हेममञ्जीरसारं
नानाशब्दाद्भुताह्लादितपरिचरणाच्चारुचक्रं त्रिभङ्गम्।
नित्यं ध्यायेत् प्रभाते अरुणशतघटाशोभनं योगगम्यं
नाभौ पद्मेऽति कान्ते दशदलमणिभे भाव्यते योगिभिर्यत्॥ ५॥

या माता हरिकेशवादिसुभुजा निर्वाणसीमापुरे
स्वाधिष्ठाननिकेतने रसदले वैकुण्ठमूले परा।
जन्मोद्धारविकारभावलहरी वेदप्रभा भाव्यते
कन्दर्पार्पितशान्तियोनिजननी विष्णुप्रिया शाङ्करी॥ ६॥

या भासानलकुण्डली कुलपथोद्दामाभशोभाकरी
मूले पद्मचतुर्दले कुलवती निःश्वासदेशाश्रिता।
साक्षात् कांक्षितकल्पवृक्षलतिका सुप्ता स्वयम्भूप्रिया
नित्या योगिभयापहा विषहरा गुर्वम्बिका भाव्यते॥ ७॥

ऊर्ध्वाम्भोरुहनिःसृतामृतघटी मोदाज्जलाप्लाविता
गुर्वाद्या परिपातु सूक्ष्मपथगा तेजोमयी भास्वती।

सूक्ष्मा साधनगोचरामृतमयी मूलादि शीर्षाम्बुजे
पूज्या चेतसि भाव्यते भुवि कदा माता सदोर्ध्वोद्गमा ॥ ८ ॥

स्थितिपालनयोगेन ध्यानेन स्तवनेन वा ।
यः पठेत् प्रत्यहं व्याप्य स देवो न तु मानुषः ॥ ९ ॥
कल्याणं धनं चैव कीर्तिमायुर्यशः श्रियम् ।
सायाह्ने च प्रभाते च पठेद्यदि सुबुद्धिमान् ॥ १० ॥
स भवेत् साधकश्रेष्ठः कल्पद्रुमकलेवरः ।
स्तवस्यास्य प्रसादेन वागीशत्वमवाप्नुयात् ॥ ११ ॥

॥ इति रुद्रयामले महातन्त्रे ऊर्ध्वाम्नाय गुरुस्तोत्रम् ॥

śiraḥsthasitapaṅkaje taruṇakoṭicandraprabhaṃ
varābhayakarāmbujaṃ sakaladevatārūpiṇam |
bhajāmi varadaṃ guruṃ kiraṇacāruśobhākulaṃ
prakāśitapadadvayāmbujamalaktakoṭiprabham || 1 ||

jagadbhayanivāraṇaṃ bhuvanabhogamokṣapradaṃ
guroḥ padayugāmbujaṃ bhajati yatra yoge jayam |
bhajāmi paramaṃ guruṃ nayanapadmamadhyasthitaṃ
bhavābdhibhayanāśanaṃ śamanarogakālakṣayam || 2 ||

prakāśita supaṅkaje sudalaṣoḍaśākhye prabhuṃ
parāparaguruṃ bhaje sakalarājyabhogapradam |
viśālanayanadvayāmbujataḍitprabhāmaṇḍalaṃ
kaḍāramaṇipāṭaladyutimadindubindvindukam || 3 ||

mahaujasamumāpatervigatadakṣabhāge hṛdi
prabhākaraśatojjvalaṃ suvimalendukoṭyānanam |
bhajāmi parameṣṭhinaṃ gurumatīvaśobhojjvalaṃ
calācalakalevaraṃ pracapale dale dvādaśe || 4 ||

gurvaṅghrayabjaṃ śubhaṃ madananidahanaṃ hemamanjīrasāraṃ
nānāśabdādbhutāhlāditaparicaraṇāccārucakraṃ tribhaṅgam |
nityaṃ dhyāyet prabhāte aruṇaśataghaṭāśobhanaṃ yogagamyaṃ
nābhau padme.ati kānte daśadalamaṇibhe bhāvyate yogibhiryat || 5 ||

yā mātā harikeśavādisubhujā nirvāṇasīmāpure
svādhiṣṭhānaniketane rasadale vaikuṇṭhamūle parā |

janmoddhāravikārabhāvalaharī vedaprabhā bhāvyate
kandarpārpitaśāntiyonijananī viṣṇupriyā śāṅkarī || 6 ||

yā bhāsānalakuṇḍalī kulapathoddāmābhaśobhākarī
mūle padmacaturdale kulavatī niḥśvāsadeśāśritā |
sākṣāt kāṃkṣitakalpavṛkṣalatikā suptā svayambhūpriyā
nityā yogibhayāpahā viṣaharā gurvambikā bhāvyate || 7 ||

ūrdhvāmbhoruhaniḥsṛtāmṛtaghaṭī modājjalāplāvitā
gurvādyā paripātu sūkṣmapathagā tejomayī bhāsvatī |
sūkṣmā sādhanagocarāmṛtamayī mūlādi śīrṣāmbuje
pūjyā cetasi bhāvyate bhuvi kadā mātā sadordhvodgamā || 8 ||

sthitipālanayogena dhyānena stavanena vā |
yaḥ paṭhet pratyahaṃ vyāpya sa devo na tu mānuṣaḥ || 9 ||
kalyāṇaṃ dhanaṃ caiva kīrtimāyuryaśaḥ śriyam |
sāyāhne ca prabhāte ca paṭhedyadi subuddhimān || 10 ||
sa bhavet sādhakaśreṣṭhaḥ kalpadrumakalevaraḥ |
stavasyāsya prasādena vāgīśatvamavāpnuyāt || 11 ||

|| iti rudrayāmale mahātantre ūrdhvāmnāya gurustotram ||

www.kamakotimandali.com